শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রী ৱেঙ্কটাচার্যস্য কৃতিষু

# ॥ শ্রীমদ্বেদান্তদেশিক অষ্টোত্তরশতনামস্তোত্রম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমদ্ৱেদান্তদেশিক অষ্টোত্তরশতনামস্তোত্রম্ ॥

নিগমান্তগুরোর্নাম্নাং প্রভাৱো যেন ৱর্ণিতঃ।
তং ৱেঙ্কটার্যমনিশং তাতার্যতনযং ভজে॥।

ৱিদুষা ৱেঙ্কটার্যেণ তাতার্যতনুজন্মনা।
ৱেদান্তার্যগুরোর্নাম্নাং প্রভাৱো ৱর্ণ্যতেতরাম্॥।

সাংখ্যসৌগতচার্ৱাকশাঙ্করাদিতমোনুদম্।
ত্রয্যন্তদেশিকং ৱন্দে ৱেঙ্কটেশাহ্ৱযং মহঃ॥।

শ্রীমদ্ৱেঙ্কটনাথস্য নাম্নামষ্টোত্তরং শতম্।
সঙ্গৃহ্য তৎপ্রসাদায ৱক্ষ্যে সর্ৱার্থসিদ্ধিদম্॥।

ঘণ্টাৱতারোঽনন্তার্য তনযো ৱেঙ্কটাধিপঃ।
শ্রীমল্লক্ষ্মণযোগ্যংশো ৱরদাচার্য ৱীক্ষিতঃ॥ **1** ॥

রামানুজার্যসংদৃষ্টঃ সৌপর্ণ মনুচিন্তকঃ।
তার্ক্ষ্য দত্তৱরশ্শুদ্ধঃ প্রসাদিতহযাননঃ॥ **2** ॥

অধীতসাঙ্গ সকলশ্রুতিস্স্মৃতিৱিদগ্রণীঃ।
ইতিহাসপুরাণজ্ঞঃ সুকৱিস্তর্কতত্ত্ৱৱিৎ॥ **3** ॥

ভাষ্যকারো ভযহরঃ সুধাশীদুগ্ধরাশিকৃৎ।
প্রধানপ্রতিতন্ত্রজ্ঞো দেৱতাপারমার্থ্যৱিৎ॥ **4** ॥

শ্রুতৱিদ্যশ্শ্রাৱযিতা শ্রুতপালশ্শ্রুতপ্রদঃ।
শ্রিতঃ পাণ্ডিত্যদাতা চ কৃতকৃত্যঃ কৃতী সুধীঃ॥ **5**॥

নিরস্তসাঙ্খ্যঃ প্রত্যুক্তযোগঃ কাণাদভঞ্জনঃ।
অচিচ্চৈতন্যৱাদঘ্নঃ ক্ষণিকাণুমতার্দনঃ॥ **6**॥

সাকারধীনিরাকর্তা শূন্যৱাদতমোনুদঃ।
কুদৃষ্ট্যুরগপক্ষীশঃ সপ্তভঙ্গী ৱিলোপনঃ॥ **7**॥

ভেদাভেদমতচ্ছেত্তা ধৃতযাদৱকল্পনঃ।
অনীশৱাদদম্ভোলিঃ পাষণ্ডমতখণ্ডনঃ॥ **8**॥

সংরক্ষিতাগমশ্শঙ্খচক্রধারণরক্ষিতা।
ঊর্ধ্ৱপুণ্ড্রাঙ্কনত্রাতা শুদ্ধসত্ত্ৱমযাকৃতিঃ॥ **9**॥

যত্যাচারপ্রতিষ্ঠাতা সর্ৱতন্ত্রস্ৱতন্ত্রধীঃ।
অৱতার রহস্যজ্ঞস্ত্ৱর্চাসৌন্দর্য সক্তধীঃ॥ **10**॥

অর্থপঞ্চক তত্ত্ৱজ্ঞঃ তত্ত্ৱত্রযৱিশেষৱিৎ।
ভক্তিযোগ ৱিরোধিঘ্নো ভক্তিমান্ ভগৱৎপ্রিযঃ॥ **11**॥

জ্ঞানৈকসারো দ্ৱযৱিৎ ৱিভক্তাধিকৃতিত্রযঃ।
চতুশ্শ্লোক্যর্থ সারজ্ঞঃ সম্যগ্জ্ঞাতাঙ্গপঞ্চকঃ॥ **12**॥

ষডঙ্গযোগ নির্ণেতা সপ্ততন্তুকৃদুত্তমঃ।
অষ্টাক্ষরৈকনিরতো নৱমৈকরসাশ্রযঃ॥ **13**॥

দশতাৎপর্যৱিজ্ঞাতা শতকৃচ্ছ সহস্রৱিৎ।
স্থূললক্ষোঽনেকনানাকোটিজ্ঞান নিৱর্তকঃ॥ **14**॥

ধর্মশঙ্কুঃ সাধুবৃন্দৱন্দিতাঙ্ঘ্রিসরোরুহঃ।
পদ্মাক্ষানন্দজনকস্তথাঽনন্তগুণাকরঃ॥ **15**॥

ত্যাগশব্দার্থৱিৎ ধর্মৱেদী ৱিধিৱিশেষৱিৎ।
উত্তমশ্লোকভাৱজ্ঞঃ পঞ্চকালপরাযণঃ॥ **16**॥

সুরসেৱ্যঃ পূর্ণমনাঃ সুরীন্দ্রপ্রতিরূপকঃ।
কৱিতার্কিকপঞ্চাস্যো নিগমাঞ্চলদেশিকঃ॥ **17**॥

ৱৈদ্যো মুনীন্দ্রঃ সর্ৱজ্ঞ উপকর্তা তথৈৱ চ।
সৎসংপ্রদাযস্থিরধীরনঘঃ সত্যৱাগপি॥ **18**॥

সাধুৱৃত্তির্মুক্তডম্ভো জিতাক্ষো দীর্ঘবন্ধুমান্।
দযালুশ্শাসিতা সর্ৱ হিতাচরণতৎপরঃ॥ **19**॥

মহাগুরুঃ স্ৱর্ণৱর্ণঃ সুবাহুঃ পুণ্ডরীকদৃক্।
পৱিত্রপাণির্ৱ্যাখ্যান মুদ্রাঙ্কিতকরাম্বুজঃ॥ **20**॥

সৱ্যপাণিতলন্যস্ত দিৱ্যপুস্তকভূষণঃ।
পরশীর্ষন্যস্ত ৱামপাদাব্জ কটকোজ্জ্ৱলঃ॥ **21**॥

ইতীদং দেশিকেন্দ্রস্য নাম্নামষ্টোত্তরং শতম্।
সঙ্কীর্তযেদনুদিনং সর্ৱপাপাপনুত্তযে॥ **22**॥

পঠন্নামশতং ভক্ত্যা শ্রুৎৱা গুরুমুখাম্বুজাৎ।
প্রসাদাদ্দেশিকেন্দ্রস্য ভুক্তিমুক্তী সমশ্নুতে॥ **23**॥

একৈকমপি তন্নাম কীর্তযন্ সকৃদুত্তমম্।
সর্ৱান্ কামানৱাপ্নোতি কিমুতাষ্টোত্তরং শতম্॥ **24**॥

॥ ইতি শ্রীমদ্বেদান্তদেশিক অষ্টোত্তরশতনামস্তোত্রং সমাপ্তম্॥